# shrIRamarahasya Upanishad

# શ્રીરામરહસ્યોપનિષત્

## Document Information

Text title : Ramarahasya Upanishad

File name : ramarahasya.itx

Category : upanishhat, svara, raama

Location : doc_upanishhat

Author : Vedic tradition

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Description-comments : 54 / 108; Atharva Veda - Vaishnava upanishad

Latest update : May, 14, 2000

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 19, 2024

*sanskritdocuments.org*

# શ્રીરામરહસ્યોપનિષત્

કૈવલ્યશ્રીસ્વરૂપેણ રાજમાનં મહોઽવ્યયમ્ ।
પ્રતિયોગિવિનિર્મુક્તં શ્રીરામપદમાશ્રયે ॥

ૐ ભદ્રં કર્ણેભિઃ શ્રુણુયામ દેવાઃ । ભદ્રં પશ્યેમાક્ષભિર્યજત્રાઃ ।
સ્થિરૈરઙ્ગૈસ્તુષ્ટુવાँ સસ્તનૂભિઃ । વ્યશેમ દેવહિતં યદાયુઃ ॥

સ્વસ્તિ ન ઇન્દ્રો વૃદ્ધશ્રવાઃ । સ્વસ્તિ નઃ પૂષા વિશ્વવેદાઃ ।
સ્વસ્તિ નસ્તાર્ક્ષ્યો અરિષ્ટનેમિઃ । સ્વસ્તિ નો બૃહસ્પતિર્દધાતુ ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

ૐ રહસ્યં રમતપતં વાસુદેવં ચ મુદ્ગલમ્ ।
શાણ્ડિલ્યં પૈઙ્ગલં ભિક્ષું મહચ્છારીરકં શિખા ॥ ૧॥

સનકાદ્યા યોગિવર્યા અન્યે ચ ઋષયસ્તથા ।
પ્રહ્લાદાદ્યા વિષ્ણુભક્તા હનૂમન્તમથાબ્રુવન્ ॥ ૨॥

વાયુપુત્ર મહાબાહો કિંતત્ત્વં બ્રહ્મવાદિનામ્ ।
પુરાણેષ્વષ્ટાદશસુ સ્મૃતિષ્વષ્ટાદશસ્વપિ ॥ ૩॥

ચતુર્વેદેષુ શાસ્ત્રેષુ વિદ્યાસ્વાધ્યાત્મિકેઽપિ ચ ।
સર્વેષુ વિદ્યાદાનેષુ વિઘ્નસૂર્યેશશક્તિષુ ।
એતેષુ મધ્યે કિં તત્ત્વં કથય ત્વં મહાબલ ॥ ૪॥

હનૂમાન્હોવાચ ॥

ભો યોગીન્દ્રાશ્ચૈવ ઋષયો વિષ્ણુભક્તાસ્તથૈવ ચ ।
શ્રુણુધ્વં મામકીં વાચં ભવબન્ધવિનાશિનીમ્ ॥ ૫॥

એતેષુ ચૈવ સર્વેષુ તત્ત્વં ચ બ્રહ્મ તારકમ્ ।
રામ એવ પરં બ્રહ્મ તત્ત્વં શ્રીરામો બ્રહ્મ તારકમ્ ॥ ૬॥

વાયુપ્ત્રેણોક્તાસ્તે યોગીન્દ્રા ઋષયો વિષ્ણુભક્તા

હનૂમન્તં પપ્રચ્છુઃ રામસ્યાઙ્ગાનિ નો બ્રૂહીતિ ।
હનૂમાન્હોવાચ । વાયુપુત્રં વિઘ્નેશં વાણીં દુર્ગાં
ક્ષેત્રપાલકં સૂર્યં ચન્દ્રં નારાયણં નારસિંહં
વાયુદેવં વારાહં તત્સર્વાન્ત્સમાત્રાન્ત્સીતં લક્ષ્મણં
શત્રુઘ્નં ભરતં વિભીષણં સુગ્રીવમઙ્ગદં
જામ્બવન્તં પ્રણવમેતાનિ રામસ્યાઙ્ગાનિ જાનીથાઃ ।
તાન્યઙ્ગાનિ વિના રામો વિઘ્નકરો ભવતિ ।
પુનર્વાયુપુત્રેણોક્તાસ્તે હનૂમન્તં પપ્રચ્છુઃ ।
આઞ્જનેય મહાબલ વિપ્રાણાં ગૃહસ્થાનાં પ્રણવાધિકારઃ
કથં સ્યાદિતિ । સ હોવાચ શ્રીરામ એવોવાચેતિ । યેષામેવ
ષડક્ષરાધિકારો વર્તતે તેષાં પ્રણવાધિકારઃ સ્યાન્નાન્યેષામ્ ।
કેવલમકારોકારમકારાર્ધમાત્રાસહિતં પ્રણવમૂહ્ય
યો રામમન્ત્રં જપતિ તસ્ય શુભકરોઽહં સ્યામ્ । તસ્ય
પ્રણવસ્યાકારસ્યોકારસ્ય મકરાસ્યાર્ધમાત્રાયાશ્ચ
ઋષિશ્છન્દો દેવતા તત્તદ્વર્ણાવર્ણાવસ્થાનં
સ્વરવેદાગ્નિગુણાનુચ્ચાર્યાન્વહં પ્રણવમન્ત્રદ્વિગુણં
જપ્ત્વા પશ્ચાદ્રામમન્ત્રં યો જપેત્ સ રામો ભવતીતિ
રામેણોક્તાસ્તસ્માદ્રામાઙ્ગં પ્રણવઃ કથિત ઇતિ ॥

વિભીષણ ઉવાચ ॥

સિંહાસને સમાસીનં રામં પૌલસ્ત્યસૂદનમ્ ।
પ્રણમ્ય દણ્ડવદ્ભૂમૌ પૌલસ્ત્યો વાક્યમબ્રવીત્ । । ૭॥

રઘુનાથ મહાબાહો કેવલં કથિતં ત્વયા ।
અઙ્ગાનાં સુલભં ચૈવ કથનીયં ચ સૌલભમ્ ॥ ૮॥

શ્રીરામ ઉવાચ । અથ પઞ્ચ દણ્ડકાનિ પિતૃઘ્નો
માતૃઘ્નો બ્રહ્મઘ્નો ગુરુહનનઃ કોટિયતિઘ્નોઽનેકકૃતપાપો
યો મમ ષણ્ણવતિકોટિનામાનિ જપતિ સ તેભ્યઃ પાપેભ્યઃ
પ્રમુચ્યતે । સ્વયમેવ સચ્ચિદાનન્દસ્વરૂપો ભવેન્ન કિમ્ ।
પુનરુવાચ વિભીષણઃ । તત્રાપ્ય શક્તોઽયં કિં કરોતિ ।
સ હોવાચેમમ્ । કૈકસેય પુરશ્ચરણવિધાવશક્તો
યો મમ મહોપનિષદં મમ ગીતાં મન્નામસહસ્રં

મદ્વિશ્વરૂપં મમાષ્ટોત્તરશતં રામશતાભિધાનં
નારદોક્તસ્તવરાજં હનૂમત્પ્રોક્તં મન્ત્રરાજાત્મકસ્તવં
સીતાસ્તવં ચ રામષડક્ષરીત્યાદિભિર્મન્ત્રૈર્યો માં
નિત્યં સ્તૌતિ તત્સદૃશો ભવેન્ન કિં ભવેન્ન કિમ્ ॥

ઇતિ રામરહસ્યોપનિષદિ પ્રથમોઽધ્યાયઃ ॥ ૧॥

---

સનકાદ્યા મુનયો હનૂમન્તં પપ્રચ્છુઃ ।
આઞ્જનેય મહાબલ તારકબ્રહ્મણો રામચન્દ્રસ્ય
મન્ત્રગ્રામં નો બ્રૂહીતિ ।
હનૂમાન્હોવાચ ।
વહ્નિસ્થં શયનં વિષ્ણોરર્ધચન્દ્રવિભૂષિતમ્ ।
એકાક્ષરો મનુઃ પ્રોક્તો મન્ત્રરાજઃ સુરદ્રુમઃ ॥ ૧॥

બ્રહ્મા મુનિઃ સ્યાદ્ગાયત્રં છન્દો રામસ્ય દેવતા ।
દીર્ઘાર્ધેન્દુયુજાઙ્ગાનિ કુર્યાદ્વહ્ન્યાત્મનો મનોઃ ॥ ૨॥

બીજશક્ત્યાદિ બીજેન ઇષ્ટાર્થે વિનિયોજયેત્ ।
સરયૂતીરમન્દારવેદિકાપઙ્કજાસને ॥ ૩॥

શ્યામં વિરાસનાસીનં જ્ઞાનમુદ્રોપશોભિતમ્ ।
વામોરુન્યસ્તતદ્ધસ્તં સીતાલક્ષ્મણસંયુતમ્ ॥ ૪॥

અવેક્ષમાણમાત્માનમાત્મન્યમિતતેજસમ્ ।
શુદ્ધસ્ફટિકસંકાશં કેવલં મોક્ષકાઙ્ક્ષયા ॥ ૫॥

ચિન્તયન્પરમાત્માનં ભાનુલક્ષં જપેન્મનુમ્ ।
વહ્નિર્નારાયણો નાડ્યો જાઠરઃ કેવલોઽપિ ચ ॥ ૬॥

દ્વ્યક્ષરો મન્ત્રરાજોઽયં સર્વાભીષ્ટપ્રદસ્તતઃ ।
એકાક્ષરોક્તમૃષ્યાદિ સ્યાદાદ્યેન ષડઙ્ગકમ્ ॥ ૭॥

તારમાયારમાનઙ્ગવાક્સ્વબીજૈશ્ચ ષડ્વિધઃ ,
ત્ર્યક્ષરો મન્ત્રરાજઃ સ્યાત્સર્વાભીષ્ટફલપ્રદઃ ॥ ૮॥

દ્વ્યક્ષરશ્ચન્દ્રભદ્રાન્તો દ્વિવિધશ્ચતુરક્ષરઃ ।
ઋષ્યાદિ પૂર્વવજ્જ્ઞેયમેતયોશ્ચ વિચક્ષણૈઃ ॥ ૯॥

સપ્રતિષ્ઠૌ રમૌ વાયૌ હૃત્પઞ્ચાર્ણો મનુર્મતઃ ।
વિશ્વામિત્રઋષિઃ પ્રોક્તઃ પઙ્ક્તિશ્છન્દોઽસ્ય દેવતા ॥૧૦॥

રામભદ્રો બીજશક્તિઃ પ્રથમાર્ણમિતિ ક્રમાત્ ।
ભ્રૂમધ્યે હૃદિ નાભ્યૂર્વોઃ પાદયોર્વિન્યસેન્મનુમ્ ॥ ૧૧॥

ષડઙ્ગં પૂર્વવદ્વિદ્યાન્મન્ત્રાર્ણૈર્મનુનાસ્ત્રકમ્ ।
મધ્યે વનં કલ્પતરોર્મૂલે પુષ્પલતાસને ॥ ૧૨॥

લક્ષ્મણેન પ્રગુણિતમક્ષ્ણઃ કોણેન સાયકમ્ ।
અવેક્ષમાણં જાનક્યા કૃતવ્યજનમીશ્વરમ્ ॥ ૧૩॥

જટાભારલસચ્છીર્ષં શ્યામં મુનિગણાવૃતમ્ ।
લક્ષ્મણેન ધૃતચ્છત્રમથવા પુષ્પકોપરિ ॥ ૧૪॥

દશાસ્યમથનં શાન્તં સસુગ્રીવવિભીષણમ્ ।
એવં લબ્ધ્વા જયાર્થી તુ વર્ણલક્ષં જપેન્મનુમ્ ॥ ૧૫॥

સ્વકામશક્તિવાગ્લક્ષ્મીસ્તવાદ્યાઃ પઞ્ચવર્ણકાઃ ।
ષડક્ષરઃ ષડ્વિધઃ સ્યાચ્ચતુર્વર્ગફલપ્રદઃ ॥ ૧૬॥

પઞ્ચાશન્માતૃકામન્ત્રવર્ણપ્રત્યેકપૂર્વકમ્ ।
લક્ષ્મીવાઙ્મન્મથાદિશ્ચ તારાદિઃ સ્યાદનેકધા ॥ ૧૭॥

શ્રીમાયામન્મથૈકૈક બીજાદ્યન્તર્ગતો મનુઃ ।
ચતુર્વર્ણઃ સ એવ સ્યાત્ષડ્વર્ણો વાઞ્છિતપ્રદઃ ॥ ૧૮॥

સ્વાહાન્તો હુંફડન્તો વા નત્યન્તો વા ભવેદયમ્ ।
અષ્ટાવિંશત્યુત્તરશતભેદઃ ષડ્વર્ણ ઇરિતઃ ॥ ૧૯॥

બ્રહ્મા સંમોહનઃ શક્તિર્દક્ષિણામૂર્તિરેવ ચ ।
અગસ્ત્યશ્ચ શિવઃ પ્રોક્તા મુનયોઽક્રમાદિમે ॥ ૨૦॥

છન્દો ગાયત્રસંજ્ઞં ચ શ્રીરામશ્ચૈવ દેવતા ।
અથવા કામબીજાદેર્વિશ્વામિત્રો મુનિર્મનોઃ ॥ ૨૧॥

છન્દો દેવ્યાદિગાયત્રી રામભદ્રોઽસ્ય દેવતા ।
બીજશક્તી યથાપૂર્વં ષડ્વર્ણાન્વિન્યસેત્ક્રમાત્ ॥ ૨૨॥

બ્રહ્મરન્ધ્રે ભ્રુવોર્મધ્યે હૃન્નાભ્યૂરુષુ પાદયોઃ ।
બીજૈઃ ષડ્દીર્ઘયુક્તૈર્વા મન્ત્રાર્ણૈર્વા ષડઙ્ગકમ્ ॥ ૨૩॥

કાલાભોધરકાન્તિકાન્તમનિશં વીરાસનાધ્યાસિતં
મુદ્રાં જ્ઞાનમયીં દધાનમપરં હસ્તાંબુજં જાનુનિ ।
સીતાં પાર્શ્વગતાં સરોરુહકરાં વિદ્યુન્નિભાં રાઘવં
પશ્યન્તં મુકુટાઙ્ગદાદિવિવિધાકલ્પોજ્જ્વલાઙ્ગં ભજે ॥ ૨૪॥

શ્રીરામશ્ચન્દ્રભદ્રાન્તો ઙેન્તો નતિયુતો દ્વિધા ।
સપ્તાક્ષરો મન્ત્રરાજઃ સર્વકામફલપ્રદઃ ॥ ૨૫॥

તારાદિસહિતઃ સોઽપિ દ્વિવિધોઽષ્ટાક્ષરો મતઃ ।
તારં રામશ્ચતુર્થ્યંતઃ ક્રોડાસ્ત્રં વહ્નિતલ્પગા ॥ ૨૬॥

અષ્ટાર્ણોઽયં પરો મન્ત્રો ઋષ્યાદિઃ સ્યાત્ષડર્ણવત્ ।
પુનરષ્ટાક્ષરસ્યાથ રામ એવ ઋષિઃ સ્મૃતઃ ॥ ૨૭॥

ગાયત્રં છન્દ ઇત્યસ્ય દેવતા રામ એવ ચ ।
તારં શ્રીબીજયુગ્મં ચ બીજશક્ત્યાદયો મતાઃ ॥ ૨૮॥

ષડઙ્ગં ચ તતઃ કુર્યાન્મન્ત્રાર્ણૈરેવ બુદ્ધિમાન્ ।
તારં શ્રીબીજયુગ્મં ચ રામાય નમ ઉચ્ચરેત્ ॥ ૨૯॥

ગ્લૌંમોં બીજં વદેન્માયાં હૃદ્રામાય પુનશ્ચ તામ્ ।
શિવોમારામમન્ત્રોઽયં વસ્વર્ણસ્તુ વસુપ્રદઃ ॥ ૩૦॥

ઋષિઃ સદાશિવઃ પ્રોક્તો ગાયત્રં છન્દ ઉચ્યતે ।
શિવોમારામચન્દ્રોઽત્ર દેવતા પરિકીર્તિતઃ ॥ ૩૧॥

દીર્ઘયા માયયાઙ્ગાનિ તારપઞ્ચાર્ણયુક્તયા ।
રામં ત્રિનેત્રં સોમાર્ધધારિણં શૂલિનં પરમ્ ।
ભસ્મોદ્ધૂલિતસર્વાઙ્ગં કપર્દિનમુપાસ્મહે ॥ ૩૨॥

રામાભિરામાં સૌન્દર્યસીમાં સોમાવતંસિકામ્ ।
પાશાઙ્કુશધનુર્બાણધરાં ધ્યાયેત્રિલોચનામ્ ॥ ૩૩॥

ધ્યાયન્નેવં વર્ણલક્ષં જપતર્પણતત્પરઃ ।
બિલ્વપત્રૈઃ ફલૈઃ પુષ્પૈસ્તિલાજ્યૈઃ પઙ્કજૈર્હુનેત્ ॥ ૩૪॥

સ્વયમાયાન્તિ નિધયઃ સિદ્ધયશ્ચ સુરેપ્સિતાઃ ।
પુનરષ્ટાક્ષરસ્યાથ બ્રહ્મગાયત્ર રાઘવાઃ ॥ ૩૫॥

ઋષ્યાદયસ્તુ વિજ્ઞેયાઃ શ્રીબીજં મમ શક્તિકમ્ ।
તત્પ્રીત્યૈ વિનિયોગશ્ચ મન્ત્રાર્ણૈરઙ્ગકલ્પના ॥ ૩૬॥

કેયૂરાઙ્ગદકઙ્કણૈર્મણિગતૈર્વિદ્યોતમાનં સદા
રામં પાર્વણચન્દ્રકોટિસદૃશચ્છત્રેણ વૈ રાજિતમ્ ।
હેમસ્તમ્ભસહસ્રષોડશયુતે મધ્યે મહામણ્ડપે
દેવેશં ભરતાદિભિઃ પરિવૃતં રામં ભજે શ્યામલમ્ ॥ ૩૭॥

કિં મન્ત્રૈર્બહુભિર્વિનશ્વરફલૈરાયાસસાધ્યૈર્વૃતા
કિંચિલ્લોભવિતાનમાત્રવિફલૈઃ સંસારદુઃખાવહૈઃ ।
એકઃ સન્નપિ સર્વમન્ત્રફલદો લોભાદિદોષોજ્ઝિતઃ
શ્રીરામઃ શરણં મમેતિ સતતં મન્ત્રોઽયમષ્ટાક્ષરઃ ॥ ૩૮॥

એવમષ્ટાક્ષરઃ સમ્યક્ સપ્તધા પરિકીર્તિતઃ ।
રામસપ્તાક્ષરો મન્ત્ર આદ્યન્તે તારસંયુતઃ ॥ ૩૯॥

નવાર્ણો મન્ત્રરાજઃ સ્યાચ્છેષં ષડ્વર્ણવન્ન્યસેત્ ।
જાનકીવલ્લભં ઙેન્તં વહ્નેર્જાયાહુમાદિકમ્ ॥ ૪૦॥

દશાક્ષરોઽયં મન્ત્રઃ સ્યાત્સર્વાભીષ્ટફલપ્રદઃ ।
દશાક્ષરસ્ય મન્ત્રસ્ય વસિષ્ઠોઽસ્ય ઋષિર્વિરાટ્ ॥ ૪૧॥

છન્દોઽસ્ય દેવતા રામઃ સીતાપાણિપરિગ્રહઃ ।
આદ્યો બીજં દ્વિઠઃ શક્તિઃ કામેનાઙ્ગક્રિયા મતા ॥ ૪૨॥

શિરોલલાટભ્રૂમધ્યે તાલુકર્ણેષુ હૃદ્યપિ ।
નાભ્યૂરુજાનુપાદેષુ દશાર્ણાન્વિન્યસેન્મનોઃ ॥ ૪૩॥

અયોધ્યાનગરે રત્નચિત્રે સૌવર્ણમણ્ડપે ।
મન્દારપુષ્પૈરાબદ્ધવિતાને તોરણાઞ્ચિતે ॥ ૪૪॥

સિંહાસને સમાસીનં પુષ્પકોપરિ રાઘવમ્ ।
રક્ષોભિર્હરિભિર્દેવૈર્દિવ્યયાનગતૈઃ શુભૈઃ ॥ ૪૫॥

સંસ્તૂયમાનં મુનિભિઃ પ્રહ્વૈશ્ચ પરિસેવિતમ્ ।
સીતાલઙ્કૃતવામાઙ્ગં લક્ષ્મણેનોપસેવિતમ્ ॥૪૬॥

શ્યામં પ્રસન્નવદનં સર્વાભરણભૂષિતમ્ ।
ધ્યાયન્નેવં જપેન્મન્ત્રં વર્ણલક્ષમનન્યધીઃ ॥ ૪૭॥

રામં ઙેન્તં ધનુષ્પાણયેઽન્તઃ સ્યાદ્વહ્નિસુન્દરી ।
દશાક્ષરોઽયં મન્ત્રઃ સ્યાન્મુનિર્બ્રહ્મા વિરાટ્ સ્મૃતઃ ॥ ૪૮॥

છન્દસ્તુ દેવતા પ્રોક્તો રામો રાક્ષસમર્દનઃ ।
શેષં તુ પૂર્વવત્કુર્યાચ્ચાપબાણધરં સ્મરેત્ ॥ ૪૯॥

તારમાયારમાનઙ્ગવાક્સ્વબીજૈશ્ચ ષડ્વિધઃ ।
દશાર્ણો મન્ત્રરાજઃ સ્યાદ્રુદ્રવર્ણાત્મકો મનુઃ ॥ ૫૦॥

શેષં ષડર્ણવજ્જ્ઞેયં ન્યાસધ્યાનાદિકં બુધૈઃ ।
દ્વાદશાક્ષરમન્ત્રસ્ય શ્રીરામ ઋષિરુચ્યતે ॥ ૫૧॥

જગતી છન્દ ઇત્યુક્તં શ્રીરામો દેવતા મતઃ ।
પ્રણવો બીજમિત્યુક્તઃ ક્લીં શક્તિર્હ્રીં ચ કીલકમ્ ॥ ૫૨॥

મન્ત્રેણાઙ્ગાનિ વિન્યસ્ય શિષ્ટં પૂર્વવદાચરેત્ ।
તારં માયાં સમુચ્ચાર્ય ભરતાગ્રજ ઇત્યપિ ॥ ૫૩॥

રામં ક્લીં વહ્નિજાયાન્તં મન્ત્રોયં દ્વાદશાક્ષરઃ ।
ૐ હૃદ્ભગવતે રામચન્દ્રભદ્રૌ ચ ઙેયુતૌ ॥ ૫૪॥

અર્કાર્ણો દ્વિવિધોઽપ્યસ્ય ઋષિધ્યાનાદિપૂર્વવત્ ।
છન્દસ્તુ જગતી ચૈવ મન્ત્રાર્ણૈરઙ્ગકલ્પના ॥ ૫૫॥

શ્રીરામેતિ પદં ચોક્ત્વા જયરામ તતઃ પરમ્ ।
જયદ્વયં વદેત્પ્રાજ્ઞો રામેતિ મનુરાજકઃ ॥ ૫૬॥

ત્રયોદશાર્ણ ઋષ્યાદિ પૂર્વવત્સર્વકામદઃ ।
પદદ્વયદ્વિરાવૃત્તેરઙ્ગં ધ્યાનં દશાર્ણવત્ ॥ ૫૭॥

તારાદિસહિતઃ સોઽપિ સ ચતુર્દશવર્ણકઃ ।
ત્રયોદશાર્ણમુચ્ચાર્ય પશ્ચાદ્રામેતિ યોજયેત્ ॥ ૫૮॥

સ વૈ પઞ્ચદશાર્ણસ્તુ જપતાં કલ્પભૂરુહઃ ।
નમશ્ચ સીતાપતયે રામાયેતિ હનદ્વયમ્ ॥ ૫૯॥

તતસ્તુ કવચાસ્ત્રાન્તઃ ષોડશાક્ષર ઈરિતઃ ।
તસ્યાગસ્ત્યઋષિશ્છન્દો બૃહતી દેવતા ચ સઃ ॥ ૬૦॥

રાં બીજં શક્તિરસ્ત્રં ચ કીલકં હુમિતીરિતમ્ ।
દ્વિપઞ્ચત્રિચતુર્વર્ણૈઃ સર્વૈરઙ્ગં ન્યસેત્ક્રમાત્ ॥ ૬૧॥

તારાદિસહિતઃ સોऽપિ મન્ત્રઃ સપ્તદશાક્ષરઃ ।
તારં નમો ભગવતે રાં ङेन्तं મહા તતઃ ॥ ૬૨॥

પુરુષાય પદં પશ્ચાદ્ધૃદન્તોऽષ્ટદશાક્ષરઃ ।
વિશ્વામિત્રો મુનિશ્છન્દો ગાયત્રં દેવતા ચ સઃ ॥ ૬૩॥

કામાદિસહિતઃ સોऽપિ મન્ત્ર એકોનવિંશકઃ ।
તારં નામો ભગવતે રામાયેતિ પદં વદેત્ ॥ ૬૪॥

સર્વશબ્દં સમુચ્ચાર્ય સૌભાગ્યં દેહિ મે વદેત્ ।
વહ્નિજાયાં તથોચ્ચાર્ય મન્ત્રો વિંશાર્ણકો મતઃ ॥ ૬૫॥

તારં નમો ભગવતે રામાય સકલં વદેત્ ।
આપન્નિવારણાયેતિ વહ્નિજાયાં તતો વદેત્ ॥ ૬૬॥

એકવિંશાર્ણકો મન્ત્રઃ સર્વાભીષ્ટફલપ્રદઃ ।
તારં રમા સ્વબીજં ચ તતો દાશરથાય ચ ॥ ૬૭॥

તતઃ સીતાવલ્લભાય સર્વાભીષ્ટપદં વદેત્ ।
તતો દાય હૃદન્તોऽયં મન્ત્રો દ્વાવિંશદક્ષરઃ ॥ ૬૮॥

તારં નમો ભગવતે વીરરામાય સંવદેત્ ।
કલ શત્રૂન્ હન દ્વન્દ્વં વહ્નિજાયાં તતો વદેત્ ॥ ૬૯॥

ત્રયોવિંશાક્ષરોમન્ત્રઃ સર્વશત્રુનિબર્હણઃ ।
વિશ્વામિત્રો મુનિઃ પ્રોક્તો ગાયત્રીછન્દ ઉચ્યતે ॥ ૭૦॥

દેવતા વીરરામોऽસૌ બીજાદ્યાઃ પૂર્વવન્મતાઃ ।
મૂલમન્ત્રવિભાગેન ન્યાસાન્કૃત્વા વિચક્ષણઃ ॥ ૭૧॥

શરં ધનુષિ સન્ધાય તિષ્ઠન્તં રાવણોન્મુખમ્ ।
વજ્રપાણિં રથારૂઢં રામં ધ્યાત્વા જપેન્મનુમ્ ॥ ૭૨॥

તારં નમો ભગવતે શ્રીરામાય પદં વદેત્ ।
તારકબ્રહ્મણે ચોક્ત્વા માં તારય પદં વદેત્ ॥ ૭૩॥

નમસ્તારાત્મકો મન્ત્રશ્ચતુર્વિંશતિમન્ત્રકઃ ।
બીજાદિકં યથા પૂર્વં સર્વં કુર્યાત્ષડર્ણવત્ ॥ ૭૪॥

કામસ્તારો નતિશ્ચૈવ તતો ભગવતેપદમ્ ।

રામચન્દ્રાય ચોચ્ચાર્ય સકલેતિ પદં વદેત્ ॥ ૭૫॥

જનવશ્યકરાયેતિ સ્વાહા કામાત્મકો મનુઃ ।
સર્વવશ્યકરો મન્ત્રઃ પઞ્ચવિંશતિવર્ણકઃ ॥ ૭૬॥

આદૌ તારેણ સંયુક્તો મન્ત્રઃ ષડ્વિંશદક્ષરઃ ।
અન્તેઽપિ તારસંયુક્તઃ સપ્તવિંશતિવર્ણકઃ ॥ ૭૭॥

તારં નમો ભગવતે રક્ષોઘ્નવિશદાય ચ ।
સર્વવિઘ્નાન્ત્સમુચ્ચાર્ય નિવારય પદદ્વયમ્ ॥ ૭૮॥

સ્વાહાન્તો મન્ત્રરાજોઽયમષ્ટાવિંશતિવર્ણકઃ ।
અન્તે તારેણ સંયુક્ત એકોનત્રિંશદક્ષરઃ ॥ ૭૯॥

આદૌ સ્વબીજસંયુક્તસ્ત્રિંશદ્વર્ણાત્મકો મનુઃ ।
અન્તેઽપિ તેન સંયુક્ત એકત્રિંશાત્મકઃ સ્મૃતઃ ॥ ૮૦॥

રામભદ્ર મહેશ્વાસ રઘુવીર નૃપોત્તમ ।
ભો દશાસ્યાન્તકાસ્માકં શ્રિયં દાપય દેહિ મે ॥ ૮૧॥

આનુષ્ટુભ ઋષી રામશ્છન્દોઽનુષ્ટુપ્સ દેવતા ।
રાં બીજમસ્ય યં શક્તિરિષ્ટાર્થે વિનિયોજયેત્ ॥ ૮૨॥

પાદં હૃદિ ચ વિન્યસ્ય પાદં શિરસિ વિન્યસેત્ ।
શિખાયાં પઞ્ચભિર્ન્યસ્ય ત્રિવર્ણૈઃ કવચં ન્યસેત્ ॥ ૮૩॥

નેત્રયોઃ પઞ્ચવર્ણૈશ્ચ દાપયેત્યસ્ત્રમુચ્યતે ।
ચાપબાણધરં શ્યામં સસુગ્રીવબિભીષણમ્ ॥ ૮૪॥

હત્વા રાવણમાયાન્તં કૃતત્રૈલોક્યરક્ષણમ્ ।
રામચન્દ્રં હૃદિ ધ્યાત્વા દશલક્ષં જપેન્મનુમ્ ॥ ૮૫॥

વદેદ્દાશરથાયેતિ વિદ્મહેતિ પદં તતઃ ।
સીતાપદં સમુદ્ધૃત્ય વલ્લભાય તતો વદેત્ ॥ ૮૬॥

ધીમહીતિ વદેત્તન્નો રામશ્ચાપિ પ્રચોદયાત્
તારાદિરેષા ગાયત્રી મુક્તિમેવ પ્રયચ્છતિ ॥ ૮૭॥

માયાદિરપિ વૈદુષ્યં રામાદિશ્ચ શ્રિયઃપદમ્ ।
મદનેનાપિ સંયુક્તઃ સ મોહયતિ મેદિનીમ્ ॥ ૮૮॥

પઞ્ચ ત્રીણિ ષડર્ણૈશ્ચ ત્રીણિ ચત્વારિ વર્ણકૈઃ ।
ચત્વારિ ચ ચતુર્વર્ણૈરઙ્ગન્યાસં પ્રકલ્પયેત્ ॥ ૮૯॥

બીજધ્યાનાદિકં સર્વં કુર્યાત્ષડ્વર્ણવત્ક્રમાત્ ।
તારં નમો ભગવતે ચતુર્થ્યા રઘુનન્દનમ્ ॥ ૯૦॥

રક્ષોઘ્નવિશદં તદ્વન્મધુરેતિ વદેત્તતઃ ।
પ્રસન્નવદનં ઙેન્તં વદેદમિતતેજસે ॥ ૯૧॥

બલરામૌ ચતુર્થ્યન્તૌ વિષ્ણું ઙેન્તં નતિસ્તતઃ ।
પ્રોક્તો માલામનુઃ સપ્તચત્વારિંશદ્ભિરક્ષરૈઃ ॥ ૯૨॥

ઋષિશ્છન્દો દેવતાદિ બ્રહ્માનુષ્ટુભરાઘવાઃ ।
સપ્તર્તુસપ્તદશ ષડ્રુદ્રસંખ્યૈઃ ષડઙ્ગકમ્ ॥ ૯૩॥

ધ્યાનં દશાક્ષરં પ્રોક્તં લક્ષમેકં જપેન્મનુમ્ ।
શ્રિયં સીતાં ચતુર્થ્યન્તાં સ્વાહાન્તોઽયં ષડક્ષરઃ ॥ ૯૪॥

જનકોઽસ્ય ઋષિશ્છન્દો ગાયત્રી દેવતા મનોઃ ।
સીતા ભગવતી પ્રોક્તા શ્રીં બીજં નતિશક્તિકમ્ ॥ ૯૫॥

કીલં સીતા ચતુર્થ્યન્તમિષ્ટાર્થે વિનિયોજયેત્ ।
દીર્ઘસ્વરયુતાદ્યેન ષડઙ્ગાનિ પ્રકલ્પયેત્ ॥ ૯૬॥

સ્વર્ણાભામમ્બુજકરાં રામાલોકનતત્પરામ્ ।
ધ્યાયેત્ષટ્કોણમધ્યસ્થરામાઙ્કોપરિ શોભિતામ્ ॥ ૯૭॥

લકારં તુ સમુદ્ધૃત્ય લક્ષ્મણાય નમોન્તકઃ ।
અગસ્ત્યઋષિરસ્યાથ ગાયત્રં છન્દ ઉચ્યતે ॥ ૯૮॥

લક્ષ્મણો દેવતા પ્રોક્તો લં બીજં શક્તિરસ્ય હિ ।
નમસ્તુ વિનિયોગો હિ પુરુષાર્થ ચતુષ્ટયે ॥ ૯૯॥

દીર્ઘભાજા સ્વબીજેન ષડઙ્ગાનિ પ્રકલ્પયેત્ ।
દ્વિભુજં સ્વર્ણરુચિરતનું પદ્મનિભેક્ષણમ્ ॥ ૧૦૦॥

ધનુર્બાણધરં દેવં રામારાધનતત્પરમ્ ।
ભકારં તુ સમુદ્ધૃત્ય ભરતાય નમોન્તકઃ ॥ ૧૦૧॥

અગસ્ત્યઋષિરસ્યાથ શેષં પૂર્વવદાચરેત્ ।
ભરતં શ્યામલં શાન્તં રામસેવાપરાયણમ્ ॥ ૧૦૨॥

ધનુર્બાણધરં વીરં કૈકેયીતનયં ભજે ।
શં બીજં તુ સમુદ્ધૃત્ય શત્રુઘ્નાય નમોન્તકઃ ।
ઋષ્યાદયો યથાપૂર્વં વિનિયોગોઽરિનિગ્રહે ॥ ૧૦૩॥

દ્વિભુજં સ્વર્ણવર્ણાભં રામસેવાપરાયણમ્ ।
લવણાસુરહન્તારં સુમિત્રાતનયં ભજે ॥ ૧૦૪॥

હું હનુમાંશ્ચતુર્થ્યન્તં હૃદન્તો મન્ત્રરાજકઃ ।
રામચન્દ્ર ઋષિઃ પ્રોક્તો યોજયેત્પૂર્વવત્ક્રમાત્ ॥ ૧૦૫॥

દ્વિભુજં સ્વર્ણવર્ણાભં રામસેવાપરાયણમ્ ।
મૌઞ્જીકૌપીનસહિતં માં ધ્યાયેદ્રામસેવકમ્ ॥ ઇતિ॥ ૧૦૬॥

ઇતિ રામરહસ્યોપનિષદિ દ્વિતીયોઽધ્યાયઃ ॥ ૨॥

---

સનકાદ્યા મુનયો હનૂમન્તં પપ્રચ્છુઃ ।
આઞ્જનેય મહાબલ પૂર્વોક્તમન્ત્રાણાં
પૂજાપીઠમનુબ્રૂહીતિ । હનુમાન્ હોવાચ ।
આદૌ ષટ્કોણમ્ । તન્મધ્યે રામબીજં સશ્રીકમ્ ।
તદધોભાગે દ્વિતીયાન્તં સાધ્યમ્ । બીજોર્ધ્વભાગે
ષષ્ઠ્યન્તં સાધકમ્ । પાર્શ્વે દૃષ્ટિબીજે તત્પરિતો
જીવપ્રાણશક્તિવશ્યબીજાનિ । તત્સર્વં સન્મુખોન્મુખાભ્યાં
પ્રણવાભ્યાં વેષ્ટનમ્ । અગ્નીશાસુરવાયવ્યપુરઃપૃષ્ઠેષુ
ષટ્કોણેષુ દીર્ઘભાઞ્જિ । હૃદયાદિમન્ત્રાઃ ક્રમેણ ।
રાં રીં રૂં રૈં રૌં રઃ ઇતિ દીર્ઘભાજિ તદ્યુક્તહૃદયાદ્યસ્ત્રાન્તમ્ ।
ષટ્કોણપાર્શ્વે રમામાયાબીજે । કોણાગ્રે વારાહં હુમિતિ ।
તદ્બીજાન્તરાલે કામબીજમ્ । પરિતો વાગ્ભવમ્ । તતો વૃત્તત્રયં
સાષ્ટપત્રમ્ । તેષુ દલેષુ સ્વરાનષ્ટવર્ગાન્પ્રતિદલં
માલામનુવર્ણષટ્કમ્ । અન્તે પઞ્ચાક્ષરમ્ ।
તદ્દલકપોલેષ્વષ્ટવર્ણાન્ । પુનરષ્ટદલપદ્મમ્ ।
તેષુ દલેષુ નારાયણાષ્ટાક્ષરો મન્ત્રઃ । તદ્દલકપોલેષુ
શ્રીબીજમ્ । તતો વૃત્તમ્ । તતો દ્વાદશદલમ્ । તેષુ દલેષુ
વાસુદેવદ્વાદશાક્ષરો મન્ત્રઃ । તદ્દલકપોલેષ્વાદિક્ષાન્તાન્ ।

તતો વૃત્તમ્ । તતઃ ષોડશદલમ્ । તેષુ દલેષુ હું ફટ્
નતિસહિતરામદ્વાદશાક્ષરમ્ । તદ્દલકપોલેષુ માયાબીજમ્ ।
સર્વત્ર પ્રતિકપોલં દ્વિરાવૃત્ત્યા હ્રં સ્રં ભ્રં બ્રં ભ્રમં શ્રું
જમ્ । તતો વૃત્તમ્ । તતો દ્વાત્રિંશદ્દલપદ્મમ્ । તેષુ દલેષુ
નૃસિંહમન્ત્રરાજાનુષ્ટુભમન્ત્રઃ । તદ્દલકપોલેશ્વષ્ટવ-
સ્વેકાદશરુદ્રદ્વાદશાદિત્યમન્ત્રાઃ પ્રણવાદિનમોન્તા-
શ્ચતુર્થ્યન્તાઃ ક્રમેણ । તદ્બહિર્વષટ્કારં પરિતઃ । તતો
રેખાત્રયયુક્તં ભૂપુરમ્ । દ્વાદશદિક્ષુ રાશ્યાદિભૂષિતમ્ ।
અષ્ટનાગૈરધિષ્ઠિતમ્ । ચતુર્દિક્ષુ નારસિંહબીજમ્ ।
વિદિક્ષુ વારાહબીજમ્ । એતત્સર્વાત્મકં યન્ત્રં સર્વકામપ્રદં
મોક્ષપ્રદં ચ । એકાક્ષરાદિનવાક્ષરાન્તાનામેતદ્યન્ત્રં
ભવતિ । તદ્દશાવરણાત્મકં ભવતિ । ષટ્કોણમધ્યે
સાઙ્ગં રાઘવં યજેત્ । ષટ્કોણેષ્વઙ્ગૈઃ
પ્રથમા વૃતિઃ । અષ્ટદલમૂલે આત્માદ્યાવરણમ્ ।
તદગ્રે વાસુદેવાદ્યાવરણમ્ । દ્વિતીયાષ્ટદલમૂલે
ધૃષ્ટાદ્યાવરણમ્ । તદગ્રે હનૂમદાદ્યાવરણમ્ ।
દ્વાદશદલેષુ વસિષ્ઠાદ્યાવરણમ્ । ષોડશદલેશુ
નીલાદ્યાવરણમ્ । દ્વાત્રિંશદ્દલેષુ ધ્રુવાદ્યાવરણમ્ ।
ભૂપુરાન્તરિન્દ્રાદ્યાવરણમ્ । તદ્બહિર્વજ્રાદ્યાવરણમ્ ।
એવમભ્યર્ચ્ય મનું જપેત્ ॥

અથ દશાક્ષરાદિદ્વાત્રિંશદક્ષરાન્તાનાં મન્ત્રાણાં
પૂજાપીઠમુચ્યતે । આદૌ ષટ્કોણમ્ । તન્મધ્યે સ્વબીજમ્ ।
તન્મધ્યે સાધ્યનામાનિ । એવં કામબીજવેષ્ટનમ્ । તં
શિષ્ટેન નવાર્ણેન વેષ્ટનમ્ । ષટ્કોણેષુ
ષડઙ્ગાન્યગ્નીશાસુરવાયવ્યપૂર્વપૃષ્ઠેષુ ।
તત્કપોલેષુ શ્રીમાયે । કોણાગ્રે ક્રોધમ્ । તતો વૃત્તમ્ ।
તતોઽષ્ટદલમ્ । તેષુ દલેષુ ષટ્સંખ્યયા
માલામનુવર્ણાન્ । તદ્દલકપોલેષુ ષોડશ સ્વરાઃ ।
તતો વૃત્તમ્ । તત્પરિત આદિક્ષાન્તમ્ । તદ્બહિર્ભૂપુરમ્
સાષ્ટશૂલાગ્રમ્ । દિક્ષુ વિદિક્ષુ નારસિંહવારાહે ।
એતન્મહાયન્ત્રમ્ । આધારશક્ત્યાદિવૈષ્ણવપીઠમ્ ।

અઙ્ગૈઃ પ્રથમા વૃતિઃ । મધ્યે રામમ્ । વામભાગે
સીતામ્ । તત્પુરતઃ શાર્ઙ્ગ શરં ચ । અષ્ટદલમૂલે
હનુમદાદિદ્વિતીયાવરણમ્ । ધૃષ્ટ્યાદિતૃતીયાવરણમ્ ।
ઇન્દ્રાદિભિશ્ચતુર્થી । વજ્રાદિભિઃ પઞ્ચમી । એતદ્યન્ત્રારાધન-
પૂર્વકં દશાક્ષરાદિમન્ત્રં જપેત્ । ॥

ઇતિ રામરહસ્યોપનિષદિ તૃતીયોઽધ્યાયઃ ॥ ૩॥

---

સનકાદ્યા મુનયો હનૂમન્તં પપ્રચ્છુઃ ।
શ્રીરામમન્ત્રાણાં પુરશ્ચરણવિધિમનુબ્રૂહીતિ ।
હનૂમાન્હોવાચ ।
નિત્યં ત્રિષવણસ્નાયી પયોમૂલફલાદિભુક્ ।
અથવા પાયસાહારો હવિષ્યાન્નાદ એવ વા ॥ ૧॥

ષડ્સૈશ્ચ પરિત્યક્તઃ સ્વાશ્રમોક્તવિધિં ચરન્ ।
વનિતાદિષુ વાક્કર્મમનોભિર્નિઃસ્પૃહઃ શુચિઃ ॥ ૨॥

ભૂમિશાયી બ્રહ્મચારી નિષ્કામો ગુરુભક્તિમાન્ ।
સ્નાનપૂજાજપધ્યાનહોમતર્પણતત્પરઃ ॥ ૩॥

ગુરૂપદિષ્ટમાર્ગેણ ધ્યાયન્રામમનન્યધીઃ ।
સૂર્યેન્દુગુરુદીપાદિગોબ્રાહ્મણસમીપતઃ ॥ ૪॥

શ્રીરામસન્નિધૌ મૌની મન્ત્રાર્થમનુચિન્તયન્ ।
વ્યાઘ્રચર્માસને સ્થિત્વા સ્વસ્તિકાદ્યાસનક્રમાત્ ॥ ૫॥

તુલસીપારિજાતશ્રીવૃક્ષમૂલાદિકસ્થલે ।
પદ્માક્ષતુલસીકાષ્ઠરુદ્રાક્ષકૃતમાલયા ॥ ૬॥

માતૃકામાલયા મન્ત્રી મનસૈવ મનું જપેત્ ।
અભ્યર્ચ્ય વૈષ્ણવે પીઠે જપેદક્ષરલક્ષકમ્ ॥ ૭॥

તર્પયેત્તદ્દશાંશેન પાયસાત્તદ્દશાંશતઃ ।
જુહુયાદ્ગોઘૃતેનૈવ ભોજયેત્તદ્દશાંશતઃ ॥ ૮॥

તતઃ પુષ્પાઞ્જલિં મૂલમન્ત્રેણ વિધિવચ્ચરેત્ ।
તતઃ સિદ્ધમનુર્ભૂત્વા જીવન્મુક્તો ભવેન્મુનિઃ ॥ ૯॥

અણિમાદિર્ભજત્યેનં યૂનં વરવધૂરિવ ।
ઐહિકેષુ ચ કાર્યેષુ મહાપત્સુ ચ સર્વદા ॥ ૧૦॥

નૈવ યોજ્યો રામમન્ત્રઃ કેવલં મોક્ષસાધકઃ ।
ઐહિકે સમનુપ્રાપ્તે માં સ્મરેદ્રામસેવકમ્ ॥ ૧૧॥

યો રામં સંસ્મરેન્નિત્યં ભક્ત્યા મનુપરાયણઃ ।
તસ્યાહમિષ્ટસંસિદ્ધ્યૈ દીક્ષિતોઽસ્મિ મુનીશ્વરાઃ ॥ ૧૨॥

વાઞ્છિતાર્થં પ્રદાસ્યામિ ભક્તાનાં રાઘવસ્ય તુ ।
સર્વથા જાગરૂકોઽસ્મિ રામકાર્યધુરન્ધરઃ ॥ ૧૩॥

ઇતિ રામરહસ્યોપનિષદિ ચતુર્થોઽધ્યાયઃ ॥ ૪॥

---

સનકાદ્યા મુનયો હનૂમન્તં પપ્રચ્છુઃ ।
શ્રીરામમન્ત્રાર્થમનુબ્રૂહીતિ । હનૂમાન્હોવાચ ।
સર્વેષુ રામમન્ત્રેષુ મન્ત્રરાજઃ ષડક્ષરઃ ।
એકધાય દ્વિધા ત્રેધા ચતુર્ધા પઞ્ચધા તથા ॥ ૧॥

ષટ્સપ્તધાષ્ટધા ચૈવ બહુધાયં વ્યવસ્થિતઃ ।
ષડક્ષરસ્ય માહાત્મ્યં શિવો જાનાતિ તત્ત્વતઃ ॥ ૨॥

શ્રીરામમન્ત્રરાજસ્ય સમ્યગર્થોઽયમુચ્યતે ।
નારાયણાષ્ટાક્ષરે ચ શિવપઞ્ચાક્ષરે તથા ।
સાર્થકાર્ણદ્વયં રામો રમન્તે યત્ર યોગિનઃ ।
રકારો વહ્નિવચનઃ પ્રકાશઃ પર્યવસ્યતિ ॥ ૩॥

સચ્ચિદાનન્દરૂપોઽસ્ય પરમાત્માર્થ ઉચ્યતે ।
વ્યઞ્જનં નિષ્કલં બ્રહ્મ પ્રાણો માયેતિ ચ સ્વરઃ ॥ ૪॥

વ્યઞ્જનૈઃ સ્વરસંયોગં વિદ્ધિ તત્પ્રાણયોજનમ્ ।
રેફો જ્યોતિર્મયે તસ્માત્કૃતમાકરયોજનમ્ ॥ ૫॥

મકારોઽભ્યુદયાર્થત્વાત્સ માયેતિ ચ કીર્ત્યતે ।
સોઽયં બીજં સ્વકં યસ્માત્સમાયં બ્રહ્મ ચોચ્યતે ॥ ૬॥

સબિન્દુઃ સોઽપિ પુરુષઃ શિવસૂર્યેન્દુરૂપવાન્ ।
જ્યોતિસ્તસ્ય શિખા રૂપં નાદઃ સપ્રકૃતિર્મતઃ ॥ ૭॥

પ્રકૃતિઃ પુરુષશ્ચોભૌ સમાયાદ્બ્રહ્મણઃ સ્મૃતૌ ।
બિન્દુનાદાત્મકં બીજં વહ્નિસોમકલાત્મકમ્ ॥ ૮॥

અગ્નીષોમાત્મકં રૂપં રામબીજે પ્રતિષ્ઠિતમ્ ।
યથૈવ વટબીજસ્થઃ પ્રાકૃતશ્ચ મહાદ્રુમઃ ॥ ૯॥

તથૈવ રામબીજસ્થં જગદેતચ્ચરાચરમ્ ।
બીજોક્તમુભયાર્થત્વં રામનામનિ દૃશ્યતે ॥ ૧૦॥

બીજં માયાવિનિર્મુક્તં પરં બ્રહ્મેતિ કીર્ત્યતે ।
મુક્તિદં સાધકાનાં ચ મકારો મુક્તિદો મતઃ ॥ ૧૧॥

મારૂપત્વાદતો રામો ભુક્તિમુક્તિફલપ્રદઃ ।
આદ્યો ર તત્પદાર્થઃ સ્યાન્મકરસ્ત્વંપદાર્થવાન્ ॥ ૧૨॥

તયોઃ સંયોજનમસીત્યર્થે તત્ત્વવિદો વિદુઃ ।
નમસ્ત્વમર્થો વિજ્ઞેયો રામસ્તત્પદમુચ્યતે ॥ ૧૩॥

અસીત્યર્થે ચતુર્થી સ્યાદેવં મન્ત્રેષુ યોજયેત્ ।
તત્ત્વમસ્યાદિવાક્યં તુ કેવલં મુક્તિદં યતઃ ॥ ૧૪॥

ભુક્તિમુક્તિપ્રદં ચૈતત્તસ્માદપ્યતિરિચ્યતે ।
મનુષ્વેતેષુ સર્વેષામધિકારોઽસ્તિ દેહિનામ્ ॥ ૧૫॥

મુમુક્ષૂણાં વિરક્તાનાં તથા ચાશ્રમવાસિનામ્ ।
પ્રણવત્વાત્સદા ધ્યેયો યતીનાં ચ વિશેષતઃ ।
રામમન્ત્રાર્થવિજ્ઞાની જીવન્મુક્તો ન સંશયઃ ॥ ૧૬॥

ય ઇમામુપનિષદમધીતે સોઽગ્નિપૂતો ભવતિ ।
સ વાયુપૂતો ભવતિ । સુરાપાનાત્પૂતો ભવતિ ।
સ્વર્ણસ્તેયાત્પૂતો ભવતિ । બ્રહ્મહત્યાપૂતો ભવતિ ।
સ રામમન્ત્રાણાં કૃતપુરશ્ચરણો રામચન્દ્રો ભવતિ ।
તદેતદૃચાભ્યુક્તમ્ ।
સદા રામોઽહમસ્મીતિ તત્ત્વતઃ પ્રવદન્તિ યે ।
ન તે સંસારિણો નૂનં રામ એવ ન સંશયઃ ॥ ૐ સત્યમિત્યુપનિષત્ ॥

ૐ ભદ્રં કર્ણેભિઃ શ્રુણુયામ દેવા ભદ્રં પશ્યેમાક્ષભિર્યજત્રાઃ ।
સ્થિરૈરઙ્ગૈસ્તુષ્ટુવા ँ સસ્તનૂભિર્વ્યશેમ દેવહિતં યદાયુઃ ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

ઇતિ શ્રીરામરહસ્યોપનિષત્સમાપ્તા ॥

Encoded by Sunder Hattangadi

---

*shrIRamarahasya Upanishad*

pdf was typeset on February 19, 2024

Please send corrections to *sanskrit@cheerful.com*